IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# वैदिकवाङ्मये आश्रमव्यवस्थायाः अवधारणा

डा० मुनीशकुमारः, सहायकप्राध्यापकः संस्कृत
राजकीयःमहाविद्यालयः, सिवानी (भिवानी)

वैदिकवाङ्मयस्य अध्ययनेनज्ञायते यत् पुरातन भारतीयसमाजे आश्रमव्यवस्था विद्यमाना आसीत्। इयं व्यवस्था भारतीयसमाजस्य संस्कृतेः च अनुपमा विशेषता आसीत्।**पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्**'अस्यामेव लोकेषणायाम् आश्रितोऽस्ति अस्माकं जीवनस्य संकल्पना। भारतीयचिन्तकानां मन्तव्यः आसीत् यत् मानवजीवनस्य परं लक्ष्यःभौतिकपदार्थानां संग्रहः नास्ति अपितु मानवजीवनस्य आदर्शः परं प्रयोजनं च पुरुषार्थचतुष्टयस्य प्राप्तिरस्ति। धर्मार्थकाममोक्षाः पुरुषार्थचतुष्टयम्। धर्मार्थकाममोक्षाणाम् इति पुरुषार्थचतुष्टयप्राप्तिरेव मानवजीवनस्य मुख्यं लक्ष्यमुद्घोषितं महर्षिभिः।मोक्षप्राप्तिः अन्तिमं प्रयोजनमुच्यते।एते चत्वारः पुरुषार्थाः श्रमं विना साधयितुं न शक्यन्ते। अतः परं लक्ष्यस्य साधनाय विशिष्टस्य श्रमस्य आवस्यकता भवति।मनुष्यः श्रमपूर्वकेण निजलक्ष्यमाप्नोतु तदर्थमेव आश्रमव्यवस्थायाः परिकल्पना कृतासीत् विद्वद्भिः। भारतीयसाहित्यपरम्परानुसारं चत्वाराः आश्रमाःसन्ति- ब्रह्मचर्यः गृहस्थः वानप्रस्थः संन्यासः च।

**ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा।**
**एते गृहस्थप्रभावाश्चत्वारः पृथगाश्रमाः॥**[1]

आचार्यः गौतमः अपि चत्वारः आश्रमाः स्वीकरोति- **ब्रह्मचारी गृहस्थोभिक्षुर् वैखानस इति।**[2] मानवीयजीवनं शतायुर्मत्वा तत्त्वदर्शिभिः चतुर्षु आश्रमेषु परिकल्पिताः। अत्र एषां धर्माणां वर्णनम् अपेक्षितमस्ति।

**ब्रह्मचर्याश्रमः-** एषः मनुष्यस्य जीवनस्य प्रथमः आश्रमः विद्यते। अस्य आरम्भःआचार्येण उपयननसंस्कारात् पश्चात् गुरुकुले प्रवेशानन्तरं भवति।पिता स्वपुत्रं विद्यायै आचार्यकुलमुपनयति। अतएव उपनयनसंस्कारः गुरुकुले प्रवेशाय भवति। गुरुकुलाः प्रायः ग्रामात् नगरात् वा किञ्चत् दूरे वनप्रदेशे भवन्ति।गुरुकुले प्रवेशाय ब्राह्मणबालकस्य उपनयनं जन्मनःगर्भात् वा अष्टमे वर्षे,क्षत्रियस्य वैश्यस्यएकादशे द्वादशे वा वर्षे भवति। ब्रह्मवर्चस्वकामाय उपनयनं गर्भात् पंचमे षष्ठे अष्टमे वर्षे वा कर्तुं शक्यते –

**गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।**
**गर्भादेकादशे राज्ञो गर्भात् तु द्वादश् विशः॥**[3]
**ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।**
**राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे॥**[4]

उपनीतःबालकः यदा आचार्यस्य कुले प्रविशति तदैव सः ब्रह्मचारी इत्युच्यते। सर्वप्रथमः आचार्यः ब्रह्मचारिणंशौचाचारं होमकार्यं सन्ध्योपासनं च शिक्षयति–

**उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः।**
**आचारमग्निकार्यञ्च सन्ध्योपासनमेव च॥**[5]

तदनन्तरंसः गुरुः तं शिष्यं वेद-वेदाङ्गानाम् उपदेशं करोति। ब्रह्मचारी गुरुकुले पंचविंशतिःआयुःपर्यन्तं गुरुकुले निवसन् शिक्षाम् अर्जयति अथवा तस्मादपि अधिकसमयं तत्र निवसितुं शक्नोति।[6] अनन्तरं सः शिष्यः स्नातको भूत्वा गृहास्थाश्रमे प्रविशति।[7]

**गृहास्थाश्रमः-**वेदाध्ययनं कृत्वा ब्रह्मचारी गुरोः आज्ञया समावर्तनपूर्वकं स्नातको भूत्वासवर्णया कन्यया सह परिणीय गृहस्थजीवने प्रविशति।[8] महर्षेः मनोः परवर्तीनां विदुषां च एषा मान्यता अस्ति यत् गृहस्थजीवने यत्र पतिः पत्नी परस्परं सन्तुष्टाः प्रेमवशानुगाः भवन्ति तस्मिन् कुले निश्चितमेव कल्याणं वर्तते, धर्मार्थकामानां सिद्धिमपि भवति-

**सन्तुष्टो भार्यया भर्ता भर्त्राभार्या तथैव च।**
**यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥**
**यदा भर्ता च भार्या च परस्परवशानुगौ।**
**तदा धर्मार्थकामानां त्रयाणामपि संगतम्॥**[9]

नित्यं पंचमहायज्ञानाम् अनुष्ठानं प्रत्येकं गृहस्थस्य अनिवार्यं कर्तव्यमासीत्।एते पंचमहायज्ञाः सन्ति- ब्रह्मयज्ञः(स्वाध्यायः), देवयज्ञः, पितृयज्ञः, भूतयज्ञः(बलिवैश्वदेवयज्ञः), नृयज्ञः(अतिथियज्ञः)।[10]

कठोपनिषदि प्रसिद्धः नचिकेताख्यान एतेषां पंचमहायज्ञानां महत्त्वं प्रतिपादयति। अस्मिन् प्रसंगेअस्य कथानकस्य उद्धरणम् आवश्यकमस्ति- " वाजश्रवसः उशन् उद्दालकः सर्वमेधसं यज्ञं करोति तस्मिन् यज्ञे सः सर्वस्वं ददन् अति वृद्धाः गावः अपियाचकेभ्यो यच्छति। ताः गाः पालनीयाः सन्ति न तु दानीयाः। अनेन दानेन पिता अनन्दा नाम ते लोकान् प्राप्नोति।[11] एतत् विचार्य पुत्रः नचिकेता पितरम् उवाच भवान् कस्मै मां दास्यसीति। यदा पिता प्रत्युत्तरं न कथयति सः पुनः पुनःअकथयत्। परिणामतः क्रोधवशात् पिता अकथयत् यत् अहं मृत्यवे त्वां दास्यामि।[12] तदाआज्ञाकारी नचिकेता आचार्यं यमं प्रति गच्छति। यद्यपि पिता तं वारयितुम् इच्छति परं तु नचिकेता तस्य आदर्शस्य स्मरणं कारयित्वायमगृहं गच्छति। यमः गृहं नासीत् अतः सः तत्रैव तिस्रः रात्रीः अनश्नन् यापयति।यदा यमः प्रत्यागच्छति तदा यमपत्नी यमं प्रति कथयति यत् यस्य गृहे अतिथिःअनश्नन् वसति तस्य आशा प्रतीक्षा सुनृता पुत्राः पशवः सर्वे विनश्यन्ति अतिथिं प्रति ते सर्वे गच्छन्ति–

**आशाप्रतीक्षे संगतं सूनृतां च इष्टापूर्ते पुत्रपशूंच सर्वान्।**
**वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे॥** [13]

यमः तस्य तिस्रः रात्रीःगृहे निवासं ज्ञात्वा तं कथयति- मे स्वस्तिः अस्तु। तस्मात् प्रति त्रीन् वरान् वृणीष्व।[14] नचिकेता वररूपेणपितुःमनःशान्ति, अग्निविद्यायाः उपदेशःआत्मज्ञानं च वृणोति। यमः तस्मै वरान् ददाति।"

अनेन आख्यानेन ज्ञायते यत् १. अग्निहोत्रे विधिविधानस्य महत्त्वं वर्तते २. शेष चतुर्षु महायज्ञेषु भावनायाः कर्तव्यानां च महत्त्वं विद्यते ३. आत्मानुसन्धानं ज्ञानदानं ब्रह्मयज्ञःअस्ति।

केचन जनाःगृहस्थजीवनस्य उद्देश्यः सन्तानप्राप्तिं मन्यन्ते स्म[15] अयं तु अद्यापि वर्तते। परन्तु मम विचारः अस्ति यत् गृहस्थाश्रमे प्रवेशस्य मुख्यः उद्देश्यः तु स्वय्य आत्मभावस्य वा विस्तारः वर्तते। ब्रह्मचारी युवा न केवलं निजदेहं प्रति आत्मभावः स्वीकरोति अपितु विवाहोपरान्त तस्य आत्मभावः पतिपत्न्योःसन्ततिमध्ये च विस्तारं प्राप्नोति।

**ओ३म् समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ।**
**सं मातरिश्वा सं धाता सम् देष्ट्री दधातु नौ॥**[16]
**अङ्गादङ्गात्सम्भवसि हृदयादधि जायसे।**
**आत्मा वै पुत्र पुत्रनामासि त्वं जीव शरदः शतम्॥**[17]

अस्य आत्मभावस्य विस्तारस्य पूर्णता संन्यासाश्रमे भवति। अतः भौतिकी शारीरिकी मानसिकी च समुन्नतिः, भौतिकविषयाणामुपभोगः दाम्पत्यजीवनयापनं, वंशप्रतिष्ठायै सन्तानोत्पत्तिश्च आश्रमेऽस्मिन् विशिष्टं कर्म अस्ति। एषः आश्रमः श्रेष्ठतमः अस्ति, सर्वेषामाश्रमाणां योनिरुच्यते। अस्य महत्त्वं प्रतिपादयन् धर्मसूत्रकारः महर्षिः गौतमः कथयति –

**तेषां गृहस्थो योनिरप्रजनत्वादितरेषाम्।**[18]

धर्मशास्त्रेषु पुनः पुनः गृहस्थाश्रमस्य महत्त्वं श्रेष्ठत्वम् प्रतिपादितम्-

**यथा वायुं समाश्रित्य वर्तन्ते सर्व जन्तवः।**
**तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः॥**

यथा नदी नदाः सर्वे समुद्रे संस्थितम् यान्ति तद्वत सर्वे आश्रमिणः गृहस्थे संस्थितं यान्ति

**यथानदी नदाः सर्वे समुद्रे यान्ति संस्थितम्।**
**एवमाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितम्॥( मनुस्मृति ७/१५)**

**वानप्रस्थाश्रमः-** आपंचाशद् वर्षानन्तरंगृहस्थाश्रमस्यउत्तरदायित्वानां निर्वाहं कृत्वा साधकः वानप्रस्थाश्रमे प्रविशति। गृहस्थः साधकः यदा केशेषु श्वेतकेशं पश्यति तथा च सन्ततेः सन्ततिमपि पश्येत् तदावानप्रस्थाश्रमे प्रविशेत्। महर्षेः मनोः वचनं द्रष्टव्यमस्ति –

**गृहस्थस्तु यदा पश्येद् वलीपलितमात्मनः।**
**अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥**[19]

वनाय प्रस्थानसमये साधकः ग्राम्याहारं वेषभूषां च संत्यज्य भार्यां पुत्रेषु निक्षिप्य अथवा सार्धं नीत्वा वनं गच्छेत्। गृहत्यागकाले अग्निहोत्रं परिच्छेदं च समादाय ग्रामाद् निसृत्य वने जितेन्द्रियं भूत्वा विषयभोगानपि परित्यजेत्।[20] अरण्ये स्वाध्यायशीलो, इन्द्रियाणि संयम्य मैत्रीभावेन दानशीलः सर्वभूतानुकम्पकः भवेत्।[21] अस्मिन् तृतीये वानप्रस्थाश्रमे गताः साधकाः गुरुकुलेषु शिक्षकाः संरक्षकाः कुलपतयः च संभूय निजयोग्यतानुरूपं उत्तरदायित्वानां निर्वहन् वसन्ति। यथा मातापितरौ शिशोः काऽपि अपेक्षां न कुर्वन्ति अपितु तेषां प्रसन्नतायां स्वस्य प्रसन्नतां तेषां पीडायां स्वस्य पीडामनुभवन्ति।

तथैव एते पितामहतुल्याः साधकाः कापि अपेक्षां न कुर्वन् ब्रह्मचारीणां कृते शौचाचारस्य अग्निहोत्रस्य वेगवेदाङ्गानां च परा अपरा विद्यानां च शिक्षां प्रयच्छन्ति।[22] निजजीवनयात्रायै एते साधकाः कन्दमूलानि, पत्राणि स्वयं पतितानि फलानि विचित्य यापनं कुर्वन्ति अथवा भिक्षाटनं कृत्वा प्राणरक्षां कुर्वन्ति–

**पुष्पमूलफलैर्वापि केवलैर्वत्तयेत्सदा।**
**कालपक्वैः स्वयं शीर्णैःवैखानसमते स्थितः॥**
**तापसेष्वेवविप्रेषु यात्रिकं भैक्षमाहरेत्।**
**गृहमेधिषु चान्येषु द्विजेषु वनवासिषु॥**[23]

एवं जीवनस्य तृतीयभागं वने यापयित्वा सङ्गं च त्यक्त्वा चतुर्थे संन्यासाश्रमे प्रविशन्ति। महर्षिमनुनापि उक्तम्-

**वनेषु च विहृत्यैवं तृतीयं भागमायुषः।**
**चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत्॥**[24]

**संन्यासाश्रमः-**चतुर्थः आश्रमः संन्यासः यतिः वा वर्तते।संन्यासाश्रमे साधकः ब्रह्मचर्यपूर्वको निवसेत् , सः अग्निं गृहं सर्वसुखान् परित्यज्य मितं भाषयेत्। अकिंचनं भूत्वाएतावती एव भिक्षां चरेत् येन तस्य प्राणयात्रा भवेत्।यदा साधकस्य लोभात् मोहात् क्रोधात् रागद्वेषात् सर्वस्मात् द्वन्द्वात् वा पूर्णविरक्तिर्भवति तदा तस्य संन्यासाश्रमे प्रवेशः भवति। तस्य पिपासा केवलं आत्मज्ञाने एव भवति। लोभमोहादीनां पूर्णा निवृत्तिः कथं भविष्यति? अस्य प्रश्नस्य समाधानः शुक्लयजुर्वेदीये मन्त्रेषु निगदितः। द्रष्टव्यमस्ति-

**ओ३म् यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विचिकित्सति।।**[25]

अर्थात् यः मनुष्यः सर्वभूतानि आत्मनि पश्यति तथा च सर्वप्राणिषु आत्मानं पश्यति तदा तस्य कर्तव्येषु कर्मसु सन्देहः न भवति। अतःयस्य आत्मभावस्य एतावान् विस्तारः अभवत् यत् यस्य कृते सर्वप्राणीनां सुखदुःखाः स्वस्य सुखदुःखाः अभवन्। तस्य द्वन्द्वात् निवृत्तिः सद्यः जायते-

**ओ३म् यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र कः मोहः कः शोकः एकत्वमनुपश्यतः॥**[26]

यस्मिन् साधके ज्ञानालोकेन सर्वभूतेषु आत्मभावः दृढः अभवत् तस्मिन् साधके आत्मभावात् न कोऽपि मोहः न कोऽपि शोकः भवितुं शक्यते।चतुर्षु आश्रमेषु मानवस्य क्रमशःउत्तरोत्तरः विकासः भवति, विस्तरन् भूत्वा सः विकासःसर्वात्मभावे परिणतः भवति। संक्षेपे एते एव चत्वारःआश्रमाः। जाबालश्रुतौ अपि वर्णितमस्ति- "ब्रह्मचर्यं परिसमाप्य, गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत्"। वैदिकसाहित्यस्य परिशीलनेन इदं विज्ञायते यत्

भारतीयमनीषीणां दृष्टौ जीवनं भोगभूमिर्नास्ति अपितु अस्य परम प्रयोजनं तु सर्वभूतानां कल्याणाय नैतिकमूल्यानां रक्षणाय परमतत्त्वस्य ज्ञानाय चास्ति। महाभारतस्य शान्तिपर्वे भगवतः वेदव्यास्य इदं वचनं द्रष्टव्यम् अस्ति-

**ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुक।**
**यथोक्त चारिणः सर्वे गच्छन्ति परमां गतिम्॥(** २४२/१५/१६)

वर्तमानकाले न तादृशाः गुरुकुलाः सन्ति ब्रह्मचर्यकालस्य अपि ह्रासः अभवत् गृहस्थाश्रमोऽपि क्लेशकारी अभवत्। वानप्रस्थाश्रमस्य संन्यासाश्रमस्य न कुत्रापि स्थितिः दृश्यते।अद्यत्वे संन्यासीजनाः तु नाममात्रस्य एव संन्यासिनः सन्ति। बहुधा तु लोकेषणायां निमग्नाः आकूतसम्पतेः स्वामिनः संजाताः। किम् एतेषां आचरणं वैदिक्याः संस्कृतेरनुरूपमस्ति विद्वद्गणाः स्वयं विचारयन्तु।

**सन्दर्भाः-**


1. मनुस्मृति 6/87
2. गौतम धर्मसूत्र 1/3/2
3. मनुस्मृति 2/36
4. मनुस्मृति 2/37
5. ननुस्मृति 2/69
6. चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः।
द्वितीयमायुषो भागं कृतद्वारो गृहे वसेत्॥( मनु० 4/1)
7. षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रिवेदिकं व्रतम्।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव च॥ (मनु० 3/1-2)
गुरुणानुमतः स्नात्वा समावृतो यथाविधि।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्॥ (मनु० 3/4)
8. मनुस्मृति 3/60
9. मनुस्मृति 3/61
10. अध्यापनं ब्रह्मयज्ञःपितृयज्ञश्च तर्पणम्। होमो देवौ बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥(मनु 3/70)
11. पीतोदकाः जग्धतृणाः दुग्धदोहाः निरिन्द्रियाः।
अनन्दा नाम ते लोकास्तान् स गच्छति ताः ददत॥ (कठोपनिषद् 1/1/3)
12. कठोपनिषद् 1/1/4
13. कठोपनिषद् 1/1/8
14. तिस्रोरात्रीर्यदवात्सीर्गृहे मे, यस्यानश्नन्ब्रह्मन्नतिथिर्नमस्यः।
नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन्वरान्वृणीष्व॥ कठोपनिषद् 1/1/9
15. प्रजायै गृहमेधिनाम्० ( रघुवंशम् 1/7)
16. ऋग्वेद 10/85/47
17. पारस्कर गृह्यसूत्र 1/18/2
18. गौतमधर्मसूत्र 1/1/3
19. मनुस्मृति6/3
20. संत्यज्य ग्राम्याहारं सर्वं चैव परिच्छदम्।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव॥ (मनु० 6/3)
21. अग्निहोत्रं समादाय गृह्यं चापि परिच्छदम्।
ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः॥ (मनु० 6/4)
22. स्वाध्याये नित्युक्तः स्याद् दान्तो मैत्रः समाहितः।
दातानित्यमनादाता सर्वभूतानुकम्पकः॥ ( मनु० 6/8)
23. मनुस्मृति 6/21, 27

**24.** मनुस्मृति 6/33
**25.**यजुर्वेद 40/6
**26.** यजुर्वेद 40/7